CBSE Class 12 Sanskrit Core 2007 - 22/1

Question Paper

Conducted by the Central Board of Secondary Education (CBSE)

Time Allowed: 3 Hours **Maximum Marks: 100**

General Instructions

(i) अस्मिन् प्रश्नपत्रे 18 प्रश्नाः सन्ति।

(ii) सङ्केताभावे सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेनैव लेखनीयानि।

(iii) उत्तराणि पृथक् दत्तायाम् उत्तरपुस्तिकायाम् एव लेखनीयानि।

(iv) अस्मिन् प्रश्नपत्रे चत्वारः खण्डाः सन्ति।

(v) खण्ड क — 10 अङ्काः; खण्ड ख — 15 अङ्काः; खण्ड ग — 30 अङ्काः।

(vi) खण्ड घ — पठितांश-अवबोधनम् 35 अङ्काः; सामान्यः संस्कृतसाहित्यपरिचयः 10 अङ्काः।

Section खण्ड क — अपठितांश-अवबोधनम्

1. अधोलिखितं गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि संस्कृतेन लिखत -

भारतवर्षे पुरातनकालादेव चिकित्साशास्त्रं वर्तते, 'आयुर्वेदः' अस्यैव नामान्तरं विद्यते। नानारोगैः ग्रस्तान् लोकान् अवलोक्य करुणापूर्णहृदयाः अस्माकं प्राचीनाः ऋषयः स्वकीययोगबुद्ध्या शरीररचनाविषये, रोगाणाम् उत्पत्तिविषये, तेषां च उपचारविषये सविस्तरं प्रोक्तवन्तः चरकादिशास्त्रेषु। सुश्रुतनाम्नि ग्रन्थे तु शल्यक्रियायाः अपि वर्णनं प्राप्यते। वैदिककाले अङ्गप्रत्यारोपणस्यापि उल्लेखो विद्यते। बौद्धकाले आयुर्वेदस्य महती उन्नतिः जाता। यदा च बौद्धमतावलम्बिनः स्वमतप्रचारार्थं भारताद् बहिर्गतवन्तः, तदा तैः साकम् आयुर्वेदज्ञानमपि विदेशेषु प्रसृतम्। साम्प्रतं यूरोपमहाद्वीपे अमेरिकादिदेशेषु च आयुर्वेदं प्रति लोकानां महती अभिरुचिः दृश्यते। वस्तुतः आयुर्वेदस्य लक्ष्यमस्ति यद् मनुष्यः कथं 'जीवेम शरदः' इति लक्ष्यं प्राप्नुयात्? शतवर्षात्मकं पूर्णम् आयुः प्राप्तुम् आयुर्वेदस्य अनुसरणम् अत्यावश्यकम्।

(अ) एकपदेन संस्कृतन उत्तरत।

(i) भारतीयचिकित्साशास्त्रस्य किं नामान्तरम् अस्ति?
(ii) शल्यक्रियायाः वर्णनं कुत्र प्राप्यते?
(iii) कस्मिन् काले आयुर्वेदस्य महती प्रगतिः जाता?
(iv) बौद्धमतावलम्बिनः भारताद् बहिः कथम् अगच्छन्?

(ब) संस्कृतस्य पूर्णवाक्येन उत्तरत।

(i) बौद्धमतावलम्बिभिः सह विदेशेषु किं प्रसृतम्?
(ii) आयुर्वेदस्य अनुसरणं कुतः आवश्यकम्?

(स) 'तदा तैः साकम् आयुर्वेदज्ञानमपि प्रसृतम्' इत्यत्र 'तैः' इति सर्वनामपदं केभ्यः प्रयुक्तम्?

(द) यथानिर्देशम् उत्तरत।
(i) 'प्राचीना ऋषयः' अत्र विशेषणपदं किम्?
(ii) 'ऋषयः चरकादिशास्त्रेषु सविस्तरं प्रोक्तवन्तः' इत्यत्र कर्तृपदं किम्?
(iii) 'अन्तः' इत्यस्य विलोमपदं किम्?

(इ) अस्य गद्यांशस्य समुचितं शीर्षकं लिखत।

Section खण्ड ख — संस्कृतेन रचनात्मककार्यम्

2. मञ्जूषादत्तपदैः विद्युत्संस्थानं प्रति विद्युतः सुचारुरूपेण आपूर्तिकृते लिखिते प्रार्थनापत्रे रिक्तस्थानानि पूरयित्वा उत्तरपुस्तिकायां पुनः लिखत।

(1) _____

व्यवस्थापक महोदय!
विद्युत्संस्थानम्, कानपुरम्।
विषयः: (2) _____ विद्युदापूर्तिः।

(3) _____

सविनयं (4) _____ यद् अस्माकं वार्षिकी परीक्षा (5) _____ वर्तते। अद्यत्वे दिनानि लघूनि संजातानि। परीक्षायाः निकटकारणाद् रात्रौ चिरं (6) _____ भवति। परं रात्रौ (7) _____ सतंत न प्रवर्तते। येन अस्माकम् अध्ययनं सुचारुरूपेण न चलति। अतः (8) _____ विद्युतः आपूर्तिः (9) _____ स्यात् - इत्येतदर्थं भवद्भिः नूनं प्रबन्धाः कर्तव्याः।

इति सादरं निवेदयन्ति, (10) _____,
आदर्शमहाविद्यालयछात्रावासनिवासनः।

मञ्जूषा: छात्राः, सेवायाम्, बाधारहिता, निवेद्यते, विद्युत्प्रसारः, निकटैव, मान्याः, रात्रिकाले, समुचिता, जागरणीयम्।

3. मञ्जूषाप्रदत्तशब्दसूचीसाहाय्येन अधोदत्तं लघुकथांशं पूरयित्वा पुनः लिखत -

एकदा कस्याश्चिद् नद्याः _____ वानरमकरयोर्मध्ये अभूत्। वनारः मकराय _____ ददाति स्म। तानि फलानि खादित्वा मकरस्य _____ मकरम् अवोचद् यत् त्वया केनापि _____ स वानरः गृहम् _____, अहं तस्य मधुरतमं _____ खादितुम् इच्छामि। मूखों मकरः _____ प्रेरितः सन् _____ स्वपृष्ठे स्थापयित्वा नदीमध्यम् आनीय तत्समक्षं _____ प्रकटीकृतवान्।

मञ्जूषा: स्वाभिप्रायम्, तीरे, वानरम्, जम्बूफलानि, मैत्री, भार्यावचनैः, व्याजेन, भार्या, आनेतव्यः, हृदयम्।

4. अधोलिखितेषु, कमप्येकं विषयमधिकृत्य पञ्चवाक्यमितम् एकम् अनुच्छेदं लिखत -

दूरदर्शनम्, सत्संगतिः, दीपावली।

Section खण्ड ग — अनुप्रयुक्तव्याकरणम्

5. अधोलिखितेषु वाक्येषु रेखाङ्कितपदेषु सन्धिच्छेदं कुरुत -

(i) येनाक्रामन्ति।
(ii) आश्रितव्योऽथवा दुर्गः।
(iii) लद्दाखमार्गेणैव प्रवेशः अभवत्।
(iv) निमज्जतीन्दोः किरणेष्विवाङ्कः।
(v) बौद्धानां वार्षिकोत्सवः शीते आयाति।
(vi) गेहान्निष्क्रान्तस्य मे अक्षिणी।

6. अधोलिखितेषु वाक्येषु स्थूलपदानां विग्रहा लेख्या: -

(i) विशालकाया मूर्तिः आकर्षणकेन्द्रम्।
(ii) राष्ट्रचिन्ता गरीयसी।
(iii) अनभियुक्तानां राज्ञाम् एते दोषाः सम्भवन्ति।
(iv) महाकवेः कालिदासस्य पद्यमिदम्।
(v) पर्वतारोहणाय द्वे स्थले उपयुक्ते।
(vi) एको हि दोषो गुणसन्निपाते।

7. अधोलिखितेषु वाक्येषु कोष्ठकान्तर्गतं प्रकृतिं प्रत्ययं च योजयित्वा रिक्तस्थानानि पूरयत -

(i) आकाशम् _____ (उत्+वि+ईक्ष्+ल्यप्)।
(ii) वृषलः मां _____ इच्छति (दृश्+तुमुन्)।
(iii) _____ कौमुदीमहोत्सवः (प्रति+षिध्+क्त)।
(iv) ममापि परस्य आमन्त्रणकानि _____ (अभि+लष्+अनीयर्)।
(v) यावद् गेहं _____ जानामि (गम्+क्त्वा)।
(vi) विद्यालयस्य सूचनापट्टे _____ (वि+ज्ञप्+क्तिन्)।
(vii) इदम् अभियानं रोचकं _____ चासीत् (साहस+ठक्)।
(viii) एते सर्वोत्तमान् अङ्कान् _____ छात्राः सन्ति (लभ्+क्तवतु)।

8. अधोलिखितेषु वाक्येषु कर्तृक्रियापदयोः अन्वितिः क्रियताम् -

(i) बुद्धिः ज्ञानेन शुध्यति/शुध्यतः।
(ii) अयमेव अहोरात्रं जनयति/जनयसि।
(iii) भवन्तः पुष्पमालाभिः स्तम्भान् अलङ्कुर्वन्तु/अलंकुरु।
(iv) अये! सिंहासनम् अध्यास्ते/अध्यासते वृषलः।
(v) शीते महान् हिमराशिः निपतति/निपतन्ति।

OR

OR

8. अधोलिखितेषु वाक्येषु मञ्जूषायाः विशेषणानि संचित्य विशेष्यैः सह योजयत -

(i) विपुलराशिना धवला एते _____ गिरयः।
(ii) अत्र _____ समिद्धिः अतिनमितः छदिप्रान्तः।
(iii) _____ पादपाः निपतन्ति।
(iv) यस्य हिमं _____ न जातम्।
(v) अयं बौद्धधर्मस्य _____ श्वेतस्तूपः।

मञ्जूषा: प्रसिद्धः, लद्दाखप्रेशीया: सौभाग्यविलोपि, सुबुद्धमूलाः, शुष्यमाणैः।

9. अधोलिखितेषु कोष्ठकान्तर्गतशब्दैः सह उपयुक्तविभक्तिं प्रयुज्य रिक्तस्थानानि पूरयत -

(i) देवः चन्द्रगुप्तः _____ आज्ञापयति (युष्मद्)।
(ii) मनः _____ शुध्यति (सत्य)।
(iii) आभ्यां _____ सुवर्णशतसहस्त्रं दापय (वैतालिक)।
(iv) जलाशयं दृष्ट्वा _____ उक्तम् (मत्स्यजीविन्)।
(v) बहुप्रसिद्धा खलु _____ सुश्रुतस्य शल्यक्रिया (भगवत्)।

Section खण्ड घ — पठितांश-अवबोधनम्

10. अधोलिखितं गद्यांशं पठित्वा संस्कृतेन प्रश्नान् उत्तरत -

प्रियबान्धवाः! यूयं सर्वे दिल्लीस्थलौहस्तम्भेन परिचिता:एव। कोऽपि न अद्य यावत् जानाति कथं सः स्तम्भः विकृतिं विना तथैव तिष्ठति। अन्ये विस्मयकराः स्तम्भाः सन्ति - अहमदनगरे कम्पमानाः स्तम्भाः, सुचिन्दरं देवालये स्थिताः सङ्गीतमयाः स्तम्भाः, गोलकुण्डादुर्गे प्रतिध्वन्यात्मकाः स्तम्भाः - अद्य यावत् दिग्दिगन्तेषु अस्मांक भारतीयवैज्ञानिकानां गौरवगाथां वर्णयन्ति।

(अ) एकपदेन उत्तरत।
(i) कः विकृतिं विना तथैव तिष्ठति?
(ii) एते स्तम्भाः केषां गौरवगाथां वर्णयन्ति?

(ब) पूर्णवाक्येन उत्तरत।
कोऽपि अद्य यावत् किं न जानाति?

(स) यथानिर्देशम् उत्तरत -
(i) 'विकारम्' इत्यर्थे किं पर्यायपदमत्र प्रयुक्तम्?
(ii) 'अन्ये स्तम्भाः' इत्यत्र स्तम्भानां विशेषणं किम्?

(द) 'यूयं सर्वे' इत्यत्र 'यूयम्' इति सर्वनामपदं केभ्यः प्रयुक्तम्?

11. अधोलिखितं नाट्यांशं पठित्वा प्रश्नान् उत्तरत -

चाणक्यः - न प्रयोजनम् अन्तरा चाणक्य: स्वप्नेऽपि चेष्टते।
राजा - अत एव श्रोतुम् इच्छामि।
(नेपथ्ये वैतालिकौ काव्यपाठं कुरुतः:)
राजा - आर्यवैहीनरे! आभ्यां वैतालिकाभ्यां सुवर्णशतसहस्रं दापय।
चाणक्यः - वैहीनरे! तिष्ठ तिष्ठ। न गन्तव्यम्! वृषल! किम् अस्थाने महान् प्रजा-धनापव्ययः?
राजा - आर्येण एव सर्वत्र निरुद्धचेष्टस्य मे बन्धनमिव राज्यम्, न राज्यमिव।
चाणक्यः - वृषल! स्वयम् अनभियुक्तानां राज्ञाम् एते दोषाः सम्भवन्ति।

(अ) एकपदेन उत्तरत।
(i) कः स्वप्नेऽपि न चेष्टते?
(ii) वैतालिकौ किं कुरुतः?

(ब) पूर्णवाक्येन उत्तरत।
कीदृशस्य चन्द्रगुप्तस्य राज्यं बन्धनमिव?

(स) यथानिर्देशम् उत्तरत।
(i) 'विना' इत्यर्थे किं पर्यायपदम् अत्र प्रयुक्तम्?
(ii) अनभियुक्तानां राज्ञाम् इत्यनयोः विशेषणं किम्?

(द) 'निरुद्धचेष्टस्य में' अस्मिन् वाक्ये 'मे' इति सर्वनामपदं कस्मै प्रयुक्तम्?

12. अधोलिखितं पद्यं पठित्वा प्रश्नान् उत्तरत -

स किंसखा साधु न शास्ति योऽधिपं हितान्न य: संशृणुते स किंप्रभुः।
सदानुकूलेषु हि कुर्वते रतिं नृपेष्वमात्येषु च सर्वसम्पदः।।

(अ) एकपदेन उत्तरत।
(i) य: हितात् न संशृणुते स किमुच्यते?
(ii) यः अधिपं साधु न शास्ति स किं कथ्यते?

(ब) पूर्णवाक्येन उत्तरत।
काः कदा रतिं कुर्वते?

(स) यथानिर्देशम् उत्तरत।
(i) 'नृपम्' इत्यर्थे किं पर्यायपदम् अत्र प्रयुक्तम्?
(ii) अनुकूलेषु नृपेष्वमात्येषु एतेषु विशेषणपदं किम्?

(द) 'सदाविरुद्धेषु' इत्यस्य विलोमपदं लिखत।

13. निम्नलिखितौ श्लोकौ पठित्वा यथानिर्देशम् उत्तरत -

(i) तृणानि भूमिरुदकं वाक्चतुर्थी च सूनृता। एतान्यपि सतां गेहे नोच्छिद्यन्ते कदाचन।।
अस्य श्लोकस्य सन्दर्भग्रन्थं लेखकं च लिखत।

(ii) सुखं हि दुःखान्यनुभूय शोभते यथान्धकारादिव दीपदर्शनम्। सुखात्तु यो याति दशां दरिद्रतां स्थितः शरीरेण मृतः स जीवति।।
इमं श्लोकं कः कं प्रति कथयति?

14. अत्र प्रदत्तभावार्थत्रये शुद्धभावार्थचयनं कृत्वा लिखत -

(i) सत्त्वं च न परिभ्रष्टं यद् दरिद्रेषु दुर्लभम्।
भावार्थाः: (क) दरिद्रावस्थायां मनुष्यः भ्रष्टो भवति। (ख) दरिद्रेषु कोऽपि मानवः भ्रष्टो भवति। (ग) दरिद्रावस्थायां यस्य मनः नैव भ्रष्टं जातम्, तत्तु दुर्लभमेव।

(ii) घनीभूतं हिमं गिरिराजस्य शोभां सततं प्रवर्धयति।
भावार्थाः: (क) हिमं हिमालयं निरन्तरं प्रवर्धयति। (ख) हिमालयस्य द्युतिः शीतीभूतं हिमं प्रवर्धयति। (ग) एकत्रीभूतं हिमं सततं नगाधिराजस्य शोभां उपचितां करोति।

OR

OR

14. अधोदत्तस्य श्लोकस्य प्रदत्तं भावार्थं मञ्जूषादत्तपदैः पूरयित्वा लिखत -

शिक्षा क्षयं गच्छति कालपर्ययात् सुबद्धमूला निपतन्ति पादपाः। जलं जलस्थानगतं च शुष्यति हुतं च दत्तं च सदैव तिष्ठति।।

कालः परिवर्तनशीलः। सततं प्रवहमानेन _____ सह विद्या अपि शनैः _____ भवति। भौगोलिकपरिवर्तनकारणात् कदाचिद् _____ वृक्षा अपि नश्यन्ति। जलस्य _____ स्थानमपि कालेन _____ भवति, परं यत् किमपि _____ अर्थात् दानरूपेण दीयते, यत् च _____ अर्थात् यज्ञाग्नौ हविष्यरूपेण दीयते एते _____ तिष्ठतः।

मञ्जूषा: कालेन, हुतम्, विस्मृता, गन्तव्यम्, दत्तम्, जलहीनम्, स्थिरमूलकाः, सततम्।

15. अधोलिखितस्य श्लोकद्वयस्य प्रदत्तान्वये रिक्तस्थानपूर्तिं कृत्वा पुनः लिखत -

(अ) अशक्तैर्बलिनः शत्रोः कर्तव्यं प्रपलायनम्। आश्रितव्योऽथवा दुर्गः नान्या तेषां गतिर्भवेत्।।
अन्वयः: अशक्तैः बलिनः _____ प्रपलायनं _____, अथवा दुर्गः _____, तेषाम् अन्या _____ न भवेत्।

(आ) निवैरा विमुखीभवन्ति सुहृदः स्फीता भवत्यापदः। पापं कर्म च यत् परैरपि कृतं तत्तस्य सम्भाव्यते।।
अन्वयः: आपदः _____ भवन्ति, _____ सुहृदः विमुखीभवन्ति। परैः _____ यत् _____ कर्म कृतं तत् तस्य सम्भाव्यते।

16. अधोलिखितवाक्यानां सार्थकसंयोजनं कृत्वा क्रमेण लिखत -

(i) मत्स्यजीविनः जलाशयं निर्मत्स्यं कृतवन्तः।
(ii) एकस्मिन् जलाशये त्रयः मत्स्याः निवसन्ति स्म।
(iii) अनागविधाता सर्वान् मत्स्यान् आहूय तत् सरः त्यक्तुम् उपादिशत्।
(iv) तं जलाशयं दृष्ट्वा मत्स्यजीविनः मत्स्यसंग्रहार्थं निर्णीतवन्तः।
(v) यद् भविष्यः भविष्यम् आश्रित्य तत्रैव अतिष्ठत्।
(vi) प्रत्युत्पन्नमतिः अनागतविधात्रा सह सपरिवारं ह्रदं त्यक्त्वा अन्यं ह्रदं गच्छति।
(vii) प्रत्युत्पन्नमतिः अनागतविधातुः उपदेशं स्वीकरोति।
(viii) यद्भविष्यः भविष्यम् आश्रित्य मृत्युं प्राप्तवान्।

17. अधोलिखितपङ्क्तिषु स्थूलाक्षरपदानां प्रसङ्गानुसार शुद्धम् अर्थं चित्वा लिखत -

(i) बहुलपक्षचन्द्रस्य ज्योत्स्नापरिक्षय इव रमणीयः दरिद्रभावः। (क) बहवः पक्षाः (ख) कृष्णपक्षस्य (ग) बहूनां पक्षे।

(ii) गायत्री अमुम् एव गायति। (क) काचन बालिका (ख) प्रसिद्धः वैदिकमन्त्रः (ग) गानम्।

(iii) सुगाङ्गप्रासादस्य मार्गम् आदेशय। (क) सुगाङ्गनामकराजभावनस्य (ख) गंगाप्रसादतः (ग) सुगीतस्य।

(iv) आश्रितव्योऽथवा दुर्गः। (क) कठिनः (ख) गुप्तस्थानम् (ग) सुरक्षितस्थानम्।

18. अधोलिखितानां कवीनां देश-काल-कृतीनां यथानिर्देशं नामानि लिखत -

(अ) कवयः: (i) कालिदास (ii) भर्तृहरिः [देशः]

(ब) कवयः: (i) चाणक्यः (ii) भासः [कालः]

(स) विष्णु शर्मा [कृतिः]

(आ) संस्कृतमहाकाव्यानां कान्यपि पञ्च वैशिष्ट्यानि लिखत।
संस्कृत महाकाव्यों की किन्हीं पाँच विशेषताओं का उल्लेख कीजिए।
Write any five features of Sanskrit Mahakavyas.

अथवा (Or)

अधः मञ्जूषाप्रदत्तशब्दैः रिक्तस्थानपूर्तिं कुरुत -
(i) महाकाव्यस्य विभाजनं _____, भवति नाटकस्य च _____।
(ii) कालिदासेन _____ ग्रन्थाः विरचिताः, तेषु द्वे _____ स्तः।
(iii) महाकाव्येषु _____ न भवति, यतः एतद् _____ नास्ति।
(iv) भरद्वाजेन _____ रचितं सुश्रुतेन च _____ संहिता।
(v) गद्यमद्यमयं काव्यं _____ अभिधीयते _____ प्रसिद्धम् अस्ति।

मञ्जूषा: चम्पूः, सर्गेषु, नलचम्पूः, खण्डकाव्ये, सप्त, अङ्केषु, एका, विमानशास्त्रम्, विदूषकः, नाटकम्।

- End of Question Paper -